# शिवानन्द मण्गलम्    śivānanda maṇgalam

सदा पावनी जाह्नवेतेरवासिं सदा स्वस्वरोपानुसण्धानशीलम्

sadā pāvanī jāhnaveeteeravāsiṁ sadā svasvaroopānusaṇdhānaśīlam

सदा सुप्रसन्नं दयालुम् भजेऽहम् शिवानन्द योगीन्द्रमानन्द मूर्तिम्

sadā suprasannaṁ dayālum bhaje'ham śivānanda yogīndramānanda mūrtim  x2

हरेर्दिव्यनामं स्वयं केर्तयन्तण् हरेः पादभक्तिं सदा बोधयन्तम्

harerdivyanāmaṁ svayaṁ keertayantaṇ hareḥ pādabhaktiṁ sadā bodhayantam

हरेः पादपद्मस्थभृन्गं भजेऽहम् शिवानन्द योगीन्द्रमानन्द मूर्तिम्

hareḥ pādapadmasthabhṛngaṁ bhaje'ham śivānanda yogīndramānanda mūrtim x2

जराब्याधिदौर्बल्यसंपीडितानां सदाऽरोग्यदं यस्य कारुण्यनेत्रम्

jarābyādhidaurbalyasampīḍitānāṁ sadā'rogyadaṁ yasya kāruṇyanetram

भजेऽहम् समस्तार्त्तसेवाधुरीणं शिवानन्द योगीन्द्रमानन्द मूर्तिम्

bhaje'ham samastārttasevādhurīṇaṁ śivānanda yogīndramānanda mūrtim  x2

सदा निर्विकल्पे स्थिरं यस्य चित्तं सदा कुम्भितः प्राणवायुर्निकामम्

sadā nirvikalpe sthiraṁ yasya cittaṁ sadā kumbhitaḥ prāṇavāyurnikāmam

सदा योगनिष्ठं निरीहं भजेऽहं शिवानन्द योगीन्द्रमानन्द मूर्तिम्

sadā yoganiṣṭhaṁ nirīhaṁ bhaje'haṁ śivānanda yogīndramānanda mūrtim x2

महामुद्रा बण्धादियोगाण्ग दक्शं सुषुम्नान्तरे चित्स्वरूपे निमग्नम्

mahāmudrā baṇḍhādiyogāṇga dakśaṁ suṣumnāntare citsvarūpe nimagnam

महायोगनिद्रा विलीनं भजेऽहं शिवानन्द योगीन्द्रमानन्द मूर्तिम्

mahāyoganidrā vilīnaṁ bhaje'haṁ <u>śivānanda yogīndramānanda mūrtim  x2</u>

दयासागरं सर्वकल्याणराशिं सदा सच्चिदानन्दरूपे निलीनम्

dayāsāgaraṁ sarvakalyāṇarāśiṁ sadā saccidānandarūpe nilīnam

सदाचारशीलं भजेऽहं भजेऽहं शिवानन्द योगीन्द्रमानन्द मूर्तिम्

sadācāraśīlaṁ bhaje'haṁ bhaje'haṁ <u>śivānanda yogīndramānanda mūrtim  x2</u>

भवाम्भोदिनौकानिभं यस्य नेत्रं महामोहघोराण्धकारं हरन्तम्

bhavāmbhodinaukānibhaṁ yasya netraṁ mahāmohaghorāṇdhakāraṁ harantam

भजेऽहं सदा तं महान्तं नितान्तं शिवानन्द योगीन्द्रमानन्द मूर्तिम्

bhaje'haṁ sadā taṁ mahāntaṁ nitāntaṁ <u>śivānanda yogīndramānanda mūrtim</u> <u>x2</u>

भजेऽहं जगत्कारणं सत्स्वरोपं भजेऽहं जगद्व्यापकं चित्स्वरूपम्

bhaje'haṁ jagatkāraṇaṁ satsvaroopaṁ bhaje'haṁ jagadvyāpakaṁ citsvarūpam

भजेऽहं निजानन्दमानन्दरूप शिवानन्द योगीन्द्रमानन्द मूर्तिम्

bhaje'haṁ nijānandamānandarūpa <u>śivānanda yogīndramānanda mūrtim</u> <u>x2</u>